Amritanilayam Stotras

2.5 - ????????? ?? ??????????? - ????? ???????? ????????? ?????? ????

कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया -
न्द्वितीयकाण्डे पञ्चमः प्रश्नः – इष्टिविधानं

ओ -न्नमः परमात्मने , श्री महागणपतये नमः ,
श्री गुरुभ्यो नमः । ह॒रि॒ः ओम् ॥

वि॒श्वरू॑पो॒ वै त्वा॒ष्ट्रः पु॒रोहि॑तो
दे॒वाना॑मासी -थ्स्व॒स्रीयो -ऽसु॑राणा॒ -न्तस्य॒
त्रीणि॑ शी॒र्॒षाण्या॑सन् -थ्सोम॒पानग्ं॑
सुरा॒पान॑ -म॒न्नाद॑न॒ग्ं॒ स प्र॒त्यक्ष॑ -
न्दे॒वेभ्यो॑ भा॒गम॑वद -त्प॒रोक्ष॒मसु॑रेभ्य॒ -
स्सर्व॑स्मै॒ वै प्र॒त्यक्ष॑ -म्भा॒गं -वँ॑दन्ति॒
यस्मा॑ ए॒व प॒रोक्ष॒ं -वँ॑दन्ति॒ तस्य॑ भा॒ग
उ॑दि॒तस्तस्मा॒दिन्द्रो॑ ऽबिभेदी॒दृ -वैँ
रा॒ष्ट्रं -विँ प॒र्याव॑र्तय॒तीति॒ तस्य॒
वज्र॑मा॒दाय॑ शी॒र्॒षाण्य॑च्छिन॒द्य -
थ्सो॑म॒पान॒ - [-थ्सो॑म॒पान ᳚म् , आसी॒थ्स] 1

-मासी॒थ्स क॒पिञ्ज॑लो ऽभव॒ -द्य -थ्सु॑रा॒पान॒ग्ं॒
स क॑ल॒विङ्को॒ यद॒न्नाद॑न॒ग्ं॒ स
ति॑त्ति॒रिस्तस्या ᳚ञ्ज॒लिना ᳚
ब्रह्मह॒त्यामुपा॑गृह्णा॒ -त्ताग्ं सं॑
वँथ्स॒रम॑बिभ॒स्त -म्भू॒तान्य॒भ्य॑क्रोश॒ -
न्ब्रह्म॑ह॒न्निति॒ स पृ॑थि॒वीमुपा॑सीदद॒स्यै
ब्र॑ह्मह॒त्यायै॒ तृती॑य॒ -म्प्रति॑ गृहा॒णेति॒
सा -ऽब्र॑वी॒द्वरं॑ -वृँ॑णै खा॒ता -
त्प॑राभवि॒ष्यन्ती॑ मन्ये॒ ततो॒ मा परा॑
भूव॒मिति॑पु॒रा ते॑ [भूव॒मिति॑पु॒रा ते ᳚ , सं
वँथ्स॒रादपि॑] 2

सं वँथ्स॒रादपि॑ रोहा॒दित्य॑ब्रवी॒ -त्तस्मा ᳚ -
त्पु॒रा सं॑ वँथ्स॒रा -त्पृ॑थि॒व्यै खा॒तमपि॑
रोहति॒ वारे॑वृत॒ग्ग्॒ ह्य॑स्यै॒ तृती॑य -
म्ब्रह्मह॒त्यायै॒ प्रत्य॑गृह्णा॒ -त्त -

थ्स्वकृ॑त॒मिरि॑णमभव॒ -त्तस्मा॒दाहि॑ताग्नि -
श्श्र॒द्धादे॑व॒ -स्स्वकृ॑त॒ इरि॑णे॒ नाव॑ स्ये -
द्ब्रह्मह॒त्यायै॒ ह्ये॑ष वर्ण॒ -स्स
वन॒स्पती॒नुपा॑सीदद॒स्यै ब्र॑ह्मह॒त्यायै॒
तृती॑य॒ -म्प्रति॑ गृह्णी॒तेति॒ ते᳚ -ऽब्रुव॒न्
वरं॑ -वृँणामहै वृ॒क्णा - [वृ॒क्णात् ,
प॒रा॒भ॒वि॒ष्यन्तो॑] 3

-त्प॑राभवि॒ष्यन्तो॑ मन्यामहे॒ ततो॒ मा परा॑
भू॒मेत्या॒व्रश्च॑नाद्वो॒ भूयाग्ं॑स॒
उत्ति॑ष्ठा॒नित्य॑ब्रवी॒ -
त्तस्मा॑दा॒व्रश्च॑ना -द्वृ॒क्षाणा॒ -
म्भूयाग्ं॑स॒ उत्ति॑ष्ठन्ति॒ वारे॑वृत॒ग्ग्॒
ह्ये॑षा॒ -न्तृती॑य -म्ब्रह्मह॒त्यायै॒
प्रत्य॑गृण्ह॒न् थ्स नि॑र्या॒सो॑ ऽभव॒ -
त्तस्मा᳚न्निर्या॒सस्य॒ ना -ऽऽश्य॑ -
म्ब्रह्मह॒त्यायै॒ ह्ये॑ष वर्णो -ऽथो॒ खलु॒ य ए॒व
लोहि॑तो॒ यो वा॒ -ऽऽव्रश्च॑नान्नि॒र्येष॑ति॒
तस्य॒ ना -ऽऽश्य॑ - [ना -ऽऽश्य᳚म् , काम॑म॒न्यस्य॒] 4

-ङ्काम॑म॒न्यस्य॒ सस्त्री॑षग्ंसा॒द -
मुपा॑सीदद॒स्यै ब्र॑ह्मह॒त्यायै॒ तृती॑य॒ -
म्प्रति॑ गृह्णी॒तेति॒ ता अ॑ब्रुव॒न् वरं॑ -
वृँणामहा॒ ऋत्वि॑या -त्प्र॒जां -विँ॑न्दामहै॒
काम॒मा विज॑नितो॒ -स्स -म्भ॑वा॒मेति॒
तस्मा॒दृत्वि॑या॒ -थ्स्त्रियः॑ प्र॒जां
विँ॑न्दन्ते॒ काम॒मा विज॑नितो॒ -स्सम्भ॑वन्ति॒
वारे॑वृत॒ग्ग्॒ ह्या॑सा॒ -न्तृती॑य -
म्ब्रह्मह॒त्यायै॒ प्रत्य॑गृह्ण॒न् -थ्सा
मल॑वद्वासा अभव॒ -त्तस्मा॒ -न्मल॑व -द्वाससा॒ न सं
वँ॑देत॒ - [सं वँ॑देत , न स॒हा -ऽऽसी॑त॒] 5

-न स॒हा -ऽऽसी॑त॒ नास्या॒ अन्न॑मद्या -
द्ब्रह्मह॒त्यायै॒ ह्ये॑षा वर्ण॑ -
म्प्रति॒मुच्या ऽऽस्ते -ऽथो॒
खल्वा॑हुर॒भ्यञ्ज॑नं॒ -वाँव स्त्रि॒या
अन्न॑म॒भ्यञ्ज॑नमे॒व न प्र॑ति॒गृह्य॒ -
ङ्काम॑म॒न्यदिति॒ या -म्मल॑व -द्वाससग्ं स॒भं
वँ॑न्ति॒ यस्ततो॒ जाय॑ते॒ सो॑ -ऽभिश॒स्तो
यामर॑ण्ये॒ तस्यै᳚ स्ते॒नो या -म्परा॑ची॒ -
न्तस्यै᳚ ह्रीतमु॒ख्य॑पग॒ल्भो या स्नाति॒

तस्या॑ अ॒प्सु मारु॑को॒ या - [मारु॑को॒ या ,
अ॒भ्य॒ङ्क्ते] 6

-ऽभ्य॒ङ्क्ते तस्यै॑ दु॒श्चर्मा॒ या प्र॑लि॒खते॒
तस्यै॑ खल॒तिर॑पमा॒री या -ऽऽङ्क्ते तस्यै॑ का॒णो
या द॒तो धाव॑ते॒ तस्यै ᳚ श्या॒वद॒न् . या न॒खानि॑
निकृ॒न्तते॒ तस्यै॑ कुन॒खी या कृ॒णत्ति॒ तस्यै ᳚
क्ली॒बो या रज्जुग्॑ सृ॒जति॒ तस्या॑ उ॒ -
द्व॒न्धु॑को॒ या पु॒र्णेन॒ पिब॑ति॒ तस्या॑
उ॒न्मादु॑को॒ या ख॒र्वेण॒ पिब॑ति॒ तस्यै॑
ख॒र्वस्ति॒स्रो रात्री ᳚व्र॒त -
ञ्च॑रेदञ्ज॒लिना॑ वा॒ पिबे॒दख॑र्वेण वा॒
पात्रे॑ण प्र॒जायै॑ गोपी॒थाय॑ ॥ 7 ॥
(य -थ्सो॑म॒पान॑ - ते - वृ॒क्णात् - तस्य॒ ना -
ऽऽश्य॑ - वँ॑देत॒ -मारु॑को॒ या -ऽख॑र्वेण वा॒ -
त्रीणि॑ च) (अ . 1)

त्वष्टा॑ ह॒तपु॑त्रो॒ वीन्द्र॒ग्ं॒ सोम॒मा -
ऽह॑र॒ -त्तस्मि॒न्निन्द्र॑ उपह॒वमै ᳚च्छत॒ त -
न्नोपा ᳚ह्वयत पु॒त्र -म्मे॑ -ऽवधी॒रिति॒ स
य॑ज्ञवेश॒स -ङ्कृ॒त्वा प्रा॒सहा॒ सोम॑मपिब॒ -
त्तस्य॒ यद॒त्यशि॑ष्यत॒ त -त्त्वष्टा॑ -
ऽऽहव॒नीय॒मुप॒ प्राव॑र्तय॒ -
थ्स्वाहेन्द्र॑शत्रु -र्वर्ध॒स्वेति॒ यदव॑र्तय॒
-त्त -द्वृ॒त्रस्य॑ वृ॒त्रत्व॑ -यँदब्र॑वी॒ -
थ्स्वाहेन्द्र॑शत्रु -र्वर्ध॒स्वेति॒
तस्मा॑द॒स्ये - [तस्मा॑दस्य , इन्द्र॒ -
श्शत्रु॑रभव॒थ्स] 8

-न्द्र॒ -श्शत्रु॑रभव॒थ्स स॒भ॑
वँ॑न्न॒ग्नीषोमा॑व॒भि सम॑भव॒ -थ्स
इ॑षुमा॒त्रमि॑षुमात्र॒॑ -विँ॑ष्वङ्ङ्वर्धत॒ स
इ॒मां -लो॒ँकान॑वृणो॒द्यदि॒मां -लो॒ँकानवृ॑णो॒ -
त्त -द्वृ॒त्रस्य॑ वृ॒त्रत्व -न्तस्मा॒दिन्द्रो॑ -
ऽबिभे॒ -थ्स प्र॒जाप॑ति॒मुपा॑धाव॒ -च्छत्रु॑र्मे -
ऽ ज॒नीति॒ तस्मै॒ वज्रग्ं॑ सि॒क्त्वा
प्राय॑च्छदे॒तेन॑ ज॒हीति॒ तेना॒भ्याय॑त॒
ताव॑ब्रूताम॒ग्नीषोमौ॒ मा [ ] 9

प्रहा॑रा॒वम॒न्त -स्स्व॒ इति॒ मम॒ वै यु॒वग्ग्
स्थ॒ इत्य॑ब्रवी॒ -न्माम॒भ्येत॒मिति॒ तौ

भा॑ग॒धेय॑मैच्छेता॒ -न्ताभ्या॑ -
मे॒तम॑ग्नीषो॒मीय॒ -मेका॑दशकपाल -म्पू॒र्णमा॑से॒
प्राय॑च्छ॒ -त्ताव॑ब्रूताम॒भि सन्द॑ष्टौ॒ वै
स्वो॒ न श॑क्नुव॒ ऐतु॒मिति॒ स इन्द्र॑ आ॒त्मनः॑
शीतरू॒राव॑जनय॒ -त्तच्छी॑तरू॒रयो॒र्जन्म॒ य
ए॒वग्ं शी॑तरू॒रयो॒र्जन्म॒ वेद॒ [वेद॑, नैनग्ं॑] 10

नैनग्ं॑ शीतरू॒रौ ह॑त॒स्ताभ्या॑मेनम॒भ्य॑नय॒ -
त्तस्मा᳚ -ज्जञ्ज॒भ्यमा॑नाद॒ग्नीषोमौ॒
निर॑क्रामता -म्प्राणापा॒नौ वा ए॑न॒ -न्तद॑जहिता -
म्प्रा॒णो वै दक्षो॑ -ऽपा॒नः क्रतु॒स्तस्मा᳚ -
ज्जञ्ज॒भ्यमा॑नो ब्रूया॒न्मयि॑ दक्षक्र॒तू
इति॑ प्राणापा॒नावे॒वा -ऽऽत्म -न्ध॑त्ते॒
सर्व॒मायु॑रेति॒ स दे॒वता॑
वृ॒त्रान्नि॒र्॒हूय॒ वार्त्र॑घ्नग्ं ह॒विः
पू॒र्णमा॑से॒ निर॑वप॒ -द्घ्नन्ति॒ वा ए॑न -
म्पू॒र्णमा॑स॒ आ - [आ, अ॒मा॒वा॒स्या॑यां -] 11

-ऽमा॑वा॒स्या॑या -म्प्याययन्ति॒ तस्मा॒ -
द्वार्त्र॑घ्नी पू॒र्णमा॒से ऽनू᳚च्येते॒
वृध॑न्वती अमावा॒स्या॑या॒ -न्त -
थ्स॒ग्ग्॒स्थाप्य॒ वार्त्र॑घ्नग्ं
ह॒विर्वज्र॑मा॒दाय॒ पुन॑र॒भ्या॑यत॒ ते
अ॑ब्रूता॒ -न्द्यावा॑पृथि॒वी मा प्र
हा॑रा॒वयो॒र्वै श्रि॒त इति॒ ते अ॑ब्रूतां॒ -वँरं॑
-वृँणावहै॒ नक्ष॑त्रविहिता॒ -
ऽहमसा॒नीत्य॒साव॑ब्रवी - च्चि॒त्रवि॑हिता॒ -
ऽहमिती॒य -न्तस्मा॒न्नक्ष॑त्रविहिता॒ -ऽसौ
चि॒त्रवि॑हिते॒ -ऽयं -यँ ए॒व -न्द्यावा॑पृथि॒व्यो - [-
द्यावा॑पृथि॒व्योः , वरं॒ -वेँदैनं॒ -वँरो॑] 12

-र्वरं॒ -वेँदैनं॒ -वँरो॑ गच्छति॒ स आ॒भ्यामे॒व
प्रसू॑त॒ इन्द्रो॑ वृ॒त्रम॑ह॒ -न्ते दे॒वा
वृ॒त्रग्ं ह॒त्वा -ऽग्नीषोमा॑वब्रुवन् . ह॒व्य -
न्नो॑ वहत॒मिति॒ ताव॑ब्रूता॒मप॑तेजसौ॒ वै त्यौ
वृ॒त्रे वै त्ययो॒स्तेज॒ इति॒ ते᳚ -ऽब्रुव॒न् क
इ॒दमच्छै॒तीति॒ गौरित्य॑ब्रुव॒ -न्गौर्वाव
सर्व॑स्य मि॒त्रमिति॒ सा -ऽब्र॑वी॒ - [सा -ऽब्र॑वीत् ,
वरं॑ -वृँणै॒ मय्ये॒व] 13

-द्वरं॑ -वृँणै॒ मय्ये॒व स॒तो -ऽभये॑न
भुनजाद्ध्वा॒ इति॒ त -द्गौरा -ऽह॑र॒ -त्तस्मा॒ -
द्गवि॑ स॒तोभये॑न भुञ्जत ए॒तद्वा अ॒ग्नेस्तेजो॒
य -द्घृ॒तमे॒त -थ्सोम॑स्य॒ य -त्पयो॒ य
ए॒वम॒ग्नीषोम॑यो॒ स्तेजो॒ वेद॑ तेज॒स्व्ये॑व
भ॑वति ब्रह्मवा॒दिनो॑ वदन्ति किन्देव॒त्य॑ -
म्पौर्णमा॒समिति॑ प्राजाप॒त्यमिति॑ ब्रूया॒ -
त्तेनेन्द्र॑ -ञ्ज्ये॒ष्ठ -म्पु॒त्र -
न्नि॒रवा॑सायय॒दिति॒ तस्मा᳚ - -ज्ज्ये॒ष्ठ -
म्पु॒त्र -न्धने॑न नि॒रव॑साययन्ति ॥ 14 ॥
(अ॒स्य॒ – मा – वेदा – ऽऽ – द्यावा॑पृथि॒व्यो –
र॑ब्रवी॒ – दिति॒ तस्मा᳚ – च्च॒त्वारि॑ च) (अ. 2)

इन्द्रं॑ -वृँ॒त्र -ञ्ज॑घ्नि॒वाग्ंस॒ -म्मृधो॒ -ऽभि
प्रावे॑पन्त॒ स ए॒तं -वैँ॑मृ॒ध -म्पू॒ऎणमा॑से -
ऽनुनिर्वा॒प्य॑मपश्य॒ -त्त -न्निर॑वप॒ -त्तेन॒ वै स
मृधो -ऽपा॑हत॒ यद्वै॑मृ॒धः पू॒र्णमा॑से -
ऽनुनिर्वा॒प्यो॑ भव॑ति॒ मृध॑ ए॒व तेन॒ यज॑मा॒नो
ऽप॑ हत॒ इन्द्रो॑ वृ॒त्रग्ं ह॒त्वा
दे॒वता॑भिश्चेन्द्रि॒येण॑ च॒ व्या᳚र्ध्यत॒ स
ए॒तमा᳚ग्ने॒य -म॒ष्टाक॑पाल -
ममावा॒स्या॑यामपश्यदै॒न्द्र -न्दधि॒ [-दधि॑, त -
न्निर॑वप॒ -त्तेन॒] 15

त -न्निर॑वप॒ -त्तेन॒ वै स दे॒वता᳚श्चेन्द्रि॒य -
ञ्चावा॑रुन्ध॒यदा᳚ग्ने॒यो᳚ ऽष्टाक॑पालो
ऽमावा॒स्या॑या॒ -म्भव॑त्यै॒न्द्र -न्दधि॑
दे॒वता᳚श्चै॒व तेने᳚न्द्रि॒य -ञ्च॒ यज॑मा॒नो -ऽव॑
रुन्ध॒ इन्द्र॑स्य वृ॒त्र -ञ्ज॒घ्नुष॑
इन्द्रि॒यं -वीँ॒र्य॑ -म्पृथि॒वीमनु॒
व्या᳚र्च्छ॒ -त्तदोष॑धयो वी॒रुधो॑ -ऽभव॒न् थ्स
प्र॒जाप॑ति॒मुपा॑धाव -द्वृ॒त्र -म्मे॑ ज॒घ्नुष॑
इन्द्रि॒यं -वीँ॒र्य॑ - [वी॒र्य᳚म् , पृ॒थि॒वीमनु॒]
16

-म्पृथि॒वीमनु॒ व्या॑र॒ -त्तदोष॑धयो वी॒रुधो॑ -
ऽभूव॒न्निति॒ स प्र॒जाप॑तिः
प॒शून॑ब्रवीदे॒तद॑स्मै॒ स -न्न॑य॒तेति॒ त -
त्प॒शव॒ ओष॑धी॒भ्यो ऽध्या॒त्मन् -थ्सम॑नय॒ -न्त -
त्प्रत्य॑दुह॒न्॒ . य -थ्स॒मन॑य॒ -न्त -थ्सा᳚ -
न्ना॒य्यस्य॑ सान्नाय्य॒त्वं -यँ -

त्प्र॒त्यदु॑ह॒ -न्त -त्प्र॑ति॒धुषः॑
प्रतिधु॒क्त्वग्ं सम॑नैषुः॒ प्रत्य॑धुक्ष॒ -न्न
तु मयि॑ श्रयत॒ इत्य॑ब्रवीदे॒तद॑स्मै [ ] 17

शृ॒त -ङ्कु॑रु॒तेत्य॑ब्रवी॒ -त्तद॑स्मै शृ॒त -
म॑कुर्वन्निन्द्रि॒यं -वाँवास्मि॑न् वी॒र्य॑ -
न्तद॑श्रय॒ -न्तच्छृ॒तस्य॑ शृत॒त्वग्ं
सम॑नैषुः॒ प्रत्य॑धुक्षञ्छृ॒तम॑क्र॒ -न्न तु मा॑
धिनो॒तीत्य॑ब्रवीदे॒तद॑स्मै॒ दधि॑
कुरु॒तेत्य॑ब्रवी॒ -त्तद॑स्मै॒ दद्ध्य॑कुर्व॒ -
न्तदे॑नमधिनो॒ -त्तद्द॒द्ध्नो द॑धि॒त्व -
म्ब्र॑ह्मवा॒दिनो॑ वदन्ति द॒द्ध्नः
पूर्व॑स्याव॒देय॒ - [पूर्व॑स्याव॒देय᳚म् , दधि॒ हि]
18

-न्दधि॒ हि पूर्व॑ -ङ्क्रि॒यत॒ इत्यना॑दृत्य॒
तच्छृ॒तस्यै॒व पूर्व॒स्याव॑
द्येदिन्द्रि॒यमे॒वास्मि॑न् वी॒र्यग्ग्॑
श्रि॒त्वा द॒द्ध्नो परि॑ष्टाद्धिनोति
यथापू॒र्वमुपै॑ति॒ य -त्पू॒तीकै᳚र्वा
पर्णव॒ल्कैर्वा॑ ऽऽत॒ञ्च्या -थ्सौ॒म्य -न्तद्य -
त्क्व॑लै राक्ष॒स -न्तद्य -
त्त॑ण्डु॒लैर्वै᳚श्वदे॒व -न्तद्यदा॒तञ्च॑नेन
मानु॒ष -न्त -द्य -द्द॒द्ध्ना त -थ्सेन्द्र॑ -
न्द॒द्ध्ना ऽऽत॑नक्ति [त॑नक्ति ,
से॒न्द्र॒त्वाया᳚ -] 19

सेन्द्र॒त्वाया᳚ -ऽग्निहोत्रोच्छेष॒णम॒भ्या -
त॑नक्ति य॒ज्ञस्य॒ सन्त॑त्या॒ इन्द्रो॑
वृ॒त्रग्ं ह॒त्वा परा᳚ -म्परा॒वत॑ -मगच्छ॒ -
दपा॑राध॒मिति॒ मन्य॑मान॒स्त -न्दे॒वताः॒
प्रैष॑मैच्छ॒न् -थ्सो᳚ -ऽब्रवी -
त्प्र॒जाप॑ति॒र्यः प्र॑थ॒मो॑ -ऽनुवि॒न्दति॒
तस्य॑ प्रथ॒म -म्भा॑ग॒धेय॒मिति॒ त -म्पि॒तरो -
ऽन्व॑विन्द॒ -न्तस्मा᳚ -त्पि॒तृभ्यः॑
पूर्वे॒द्युः क्रि॑यते॒ सो॑ -ऽमावा॒स्या᳚ -
म्प्रत्या -ऽग॑च्छ॒ -त्त -न्दे॒वा अ॒भि
सम॑गच्छन्ता॒मा वै नो॒ - [वै नः॑, अ॒द्य वसु॑] 20

-ऽद्य वसु॑ वस॒तीतीन्द्रो॒ हि दे॒वानां॒ -वँसु॒
तद॑मावा॒स्या॑या अमावास्य॒त्व -

म्ब्र॑ह्मवा॒दिनो॑ वदन्ति किन्देव॒त्यग्ं॑
सान्ना॒य्यमिति॑ वैश्वदे॒वमिति॑ ब्रूया॒ -
द्विश्वे॒ हि तद्दे॒वा भा॑ग॒धेय॑म॒भि
स॒मग॑च्छ॒न्तेत्यथो॒ खल्वै॒न्द्रमित्ये॒व
ब्रू॑या॒दिन्द्रं॒ -वाँव ते त -द्भि॑ष॒ज्यन्तो॒ -
ऽभि सम॑गच्छ॒न्तेति॑ ॥ 21 ॥
(दधि॑ – मे ज॒घ्नुष॑ इन्द्रि॒यं -वीँ॒र्य॑ –
मित्य॑ब्रवीदे॒तद॑स्मा – अव॒देयं॑ – तनक्ति –
नो॒ – द्विच॑त्वारिग्ंशच्च) (अ. 3)

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति॒ स त्वै द॑॑र्
शपूर्णमा॒सौ य॑जेत॒ य ए॑नौ॒ सेन्द्रौ॒ यजे॒तेति॑
वैमृ॒धः पू॒र्णमा॑से ऽनुनिर्वा॒प्यो॑ भवति॒
तेन॑ पू॒र्णमा॑स॒ -स्सेन्द्र॑ ऐ॒न्द्र -
न्दद्ध्य॑मावा॒स्या॑या॒ -न्तेना॑मावा॒स्या॑
सेन्द्रा॒ य ए॒वं -विँ॒द्वा -न्द॑र् शपूर्णमा॒सौ
यज॑ते॒ सेन्द्रा॑वे॒वैनौ॑ यजते॒ श्व -श्श्वो᳚ -
ऽस्मा ईजा॒नाय॒ वसी॑यो भवति दे॒वा वै य -द्य॒ज्ञे
ऽकु॑र्वत॒तदसु॑रा अकुर्वत॒ ते दे॒वा ए॒ता - [दे॒वा
ए॒ताम् , इष्टि॑ -मपश्यन् -] 22

-मिष्टि॑ -मपश्य -न्नाग्नावैष्ण॒व -
मेका॑दशकपाल॒ग्ं॒ सर॑स्वत्यै च॒रुग्ं सर॑स्वते
च॒रु -न्ता -म्पौ᳚र्णमा॒सग्ं स॒ग्ग्॒स्थाप्यानु॒
निर॑वप॒ -न्ततो॑ दे॒वा अभ॑व॒ -न्परा -ऽसु॑रा॒ यो
भ्रातृ॑व्यवा॒न् थ्स्या -थ्स पौ᳚र्णमा॒सग्ं
स॒ग्ग्॒स्थाप्यै॒तामिष्टि॒मनु॒ निर्व॑पे -
त्पौर्णमा॒सेनै॒व वज्र॒ -म्भ्रातृ॑व्याय
प्र॒हृत्या᳚ -ऽऽग्नावैष्ण॒वेन॑ दे॒वता᳚श्च
य॒ज्ञ -ञ्च॒ भ्रातृ॑व्यस्य वृङ्क्ते मिथु॒ना -
न्प॒शून् -थ्सा॑रस्व॒ताभ्यां॒ -
याँव॑दे॒वास्यास्ति॒ त - [याव॑दे॒वास्यास्ति॒ तत्
, सर्वं॑ -वृँङ्क्ते] 23

-थ्सर्वं॑ -वृँङ्क्ते पौर्णमा॒सीमे॒व य॑जेत॒
भ्रातृ॑व्यवा॒न्नामा॑वा॒स्याग्ं॑ ह॒त्वा
भ्रातृ॑व्य॒ -न्ना -ऽऽप्या॑ययति
साकम्प्रस्था॒यीये॑न यजेत प॒शुका॑मो॒यस्मै॒ वा
अल्पे॑ना॒ -ऽऽहर॑न्ति॒ ना -ऽऽत्मना॒ तृप्य॑ति॒
नान्यस्मै॑ ददाति॒ यस्मै॑ मह॒ता
तृप्य॑त्या॒त्मना॒ ददा᳚त्य॒न्यस्मै॑ मह॒ता

पू॒र्णग्ं हो॑त॒व्य॑ -न्तृ॒प्त ए॒वैन॒मिन्द्रः॑
प्र॒जया॑ प॒शुभि॑स्तर्पयति दारुपा॒त्रेण॑
जुहोति॒ न हि मृ॒न्मय॒माहु॑तिमान॒श औदु॑म्बर - [
औदु॑म्बरम् , भ॒व॒त्यूर्ग्वा] 24

-म्भव॒त्यूर्ग्वा उ॑दु॒म्बर॒ ऊर् -क्प॒शव॑
ऊ॒र्जैवास्मा॒ ऊर्ज॑ -म्प॒शूनव॑ रुन्धे॒
नाग॑तश्रीर्महे॒न्द्रं -यँ॑जेत॒ त्रयो॒ वै
ग॒तश्रि॑य -श्शुश्रु॒वा -न्ग्रा॑म॒णी
रा॑ज॒न्य॑स्तेषा᳚ -म्महे॒न्द्रो दे॒वता॒ यो वै
स्वा -न्दे॒वता॑मति॒ यज॑ते॒ प्रस्वायै॑
दे॒वता॑यैच्यवते॒ न परा॒ -म्प्राप्नो॑ति॒
पापी॑या -न्भवति सं वँथ्स॒र -मिन्द्रं॑ -यँजेत सं
वँथ्स॒रग्ं हि व्र॒त -न्ना -ऽति॒ स्वै - [व्र॒त -न्ना -
ऽति॒ स्वा, ए॒वैन॑ -न्दे॒वते॒ज्यमा॑ना॒] 25

-वैन॑ -न्दे॒वते॒ज्यमा॑ना॒ भूत्या॑ इन्धे॒ वसी॑या
-न्भवति सं वँथ्स॒रस्य॑ प॒रस्ता॑द॒ग्नये᳚
व्र॒तप॑तये पुरो॒डाश॑म॒ष्टाक॑पाल॒ -न्निर्व॑पे -
थ्सं वँथ्स॒रमे॒वैनं॑ -वृँ॒त्र -ञ्ज॑घ्नि॒वाग्ं
स॑म॒ग्नि -र्व्र॒तप॑ति -र्व्र॒तमा ल॑म्भयति॒ ततो -
ऽधि॒ कामं॑ -यँजेत ॥ 26 ॥
(ए॒तां – त – दौदु॑म्बर॒ग्ग्॒ – स्वा –
त्रि॒ग्ं॒शच्च॑) (अ. 4)

नासो॑मयाजी॒ स -न्न॑ये॒दना॑गतं॒ -वाँ ए॒तस्य॒ पयो॒
यो -ऽसो॑मयाजी॒ यदसो॑मयाजी स॒ -न्नये᳚ -त्परिमो॒ष
ए॒व सो -ऽनृ॑त -ङ्करो॒त्यथो॒ परै॒व सि॑च्यते
सोमया॒ज्ये॑व स -न्न॑ये॒ -त्पयो॒ वै सोमः॒ पयः॑
सान्ना॒य्य -म्पय॑सै॒व पय॑ आ॒त्म -न्ध॑त्ते॒ वि वा
ए॒त -म्प्र॒जया॑ प॒शुभि॑रर्धयति व॒र्धय॑त्यस्य॒
भ्रातृ॑व्यं॒ -यँस्य॑ ह॒विर्निरु॑प्त -
म्पु॒रस्ता᳚च्च॒न्द्रमा॑ [
पु॒रस्ता᳚च्च॒न्द्रमाः᳚ , अ॒भ्यु॑देति॑] 27

अ॒भ्यु॑देति॑ त्रे॒धा त॑ण्डु॒लान् . वि भ॑जे॒द्ये
म॑द्ध्य॒मा -स्स्युस्तान॒ग्नये॑ दा॒त्रे
पु॑रो॒डाश॑म॒ष्टाक॑पाल -ङ्कुर्या॒द्ये
स्थवि॑ष्ठा॒स्तानिन्द्रा॑य प्रदा॒त्रे द॒धग्ग्
श्च॒रुं -येँ -ऽणि॑ष्ठा॒स्तान् . विष्ण॑वे
शिपिवि॒ष्टाय॑ शृ॒ते च॒रुम॒ग्निरे॒वास्मै᳚

प्र॒जा -म्प्र॑ज॒नय॑ति वृ॒द्धामिन्द्रः॒
प्रय॑च्छति य॒ज्ञो वै विष्णुः॑ प॒शव॒ -
श्शिपि॑र्य॒ज्ञ ए॒व प॒शुषु॒ प्रति॑तिष्ठति॒ न
द्वे [न द्वे, य॒जे॒त॒ य -त्पूर्व॑या] 28

य॑जेत॒ य -त्पूर्व॑या सम्प्र॒ति यजे॒तोत्त॑रया
छ॒म्बट्कु॑र्या॒द्यदुत्त॑रया सम्प्र॒ति यजे॑त॒
पूर्व॑या छ॒म्बट्कु॑र्या॒न्नेष्टि॒र्भव॑ति॒ न
य॒ज्ञस्तदनु॑ ह्रीतमु॒ख्य॑पग॒ल्भो जा॑यत॒
एका॑मे॒व य॑जेत प्रग॒ल्भो᳚ -ऽस्य जाय॒ते
ऽना॑दृत्य॒ त -द्द्वे ए॒व य॑जेत यज्ञ मु॒खमे॒व
पूर्व॑या॒ -ऽऽलभ॑ते॒ यज॑त॒ उत्त॑रया दे॒वता॑ ए॒व
पूर्व॑या ऽवरु॒न्ध इ॑न्द्रि॒य -मुत्त॑रया
देवलो॒कमे॒व [ ] 29

पूर्व॑या -ऽभि॒जय॑ति मनुष्यलो॒कमुत्त॑रया॒
भूय॑सो यज्ञक्र॒तूनुपै᳚त्ये॒षा वै सु॒मना॒
नामेष्टि॒र्यम॒द्येजा॒न -म्प॒श्चाच्च॒न्द्रमा॑
अ॒भ्यु॑देत्य॒स्मिन्ने॒वास्मै॑ लो॒के -ऽर्धु॑क -
म्भवति दाक्षायण य॒ज्ञेन॑ सुव॒र्गका॑मो यजेत
पू॒र्णमा॑से॒ स -न्न॑ये -न्मैत्रावरु॒ण्या
ऽऽमिक्ष॑या ऽमावा॒स्या॑यां -यँजेत पू॒र्णमा॑से॒
वै दे॒वानाग्ं॑ सु॒तस्तेषा॑मे॒तम॑र्धमा॒स -
म्प्रसु॑त॒स्तेषा᳚ -म्मैत्रावरु॒णी व॒शा -
ऽमा॑वा॒स्या॑या -मनूब॒न्ध्या॑ य - [-मनूब॒न्ध्या॑
यत्, पू॒र्वे॒द्यु र्यज॑ते॒] 30

-त्पू᳚र्वे॒द्यु र्यज॑ते॒ वेदि॑मे॒व त -त्क॑रोति॒
य -द्व॒थ्सा -न॑पाक॒रोति॑ सदोहविर्धा॒ने ए॒व स -
म्मि॑नोति॒ यद्यज॑ते दे॒वैरे॒व सु॒त्याग्ं स -
म्पा॑दयति॒ स ए॒तम॑र्धमा॒सग्ं स॑ध॒माद॑ -न्दे॒वै -
स्सोम॑ -म्पिबति॒ य -न्मै᳚त्रावरु॒ण्या
ऽऽमिक्ष॑या ऽमावा॒स्या॑यां॒ -यँज॑ते॒ यैवासौ
दे॒वानां᳚ -वँ॒शा -ऽनू॑ब॒न्ध्या॑ सो ए॒वैषैतस्य॑
सा॒क्षाद्वा ए॒ष दे॒वान॒भ्यारो॑हति॒ य ए॑षां -
यँ॒ज्ञ - [य॒ज्ञम् , अ॒भ्या॒रोह॑ति॒] 31

-म॑भ्या॒रोह॑ति॒ यथा॒ खलु॒वै
श्रेया॑न॒भ्यारू॑ढः का॒मय॑ते॒ तथा॑ करोति॒
यद्य॑व॒विद्ध्य॑ति॒ पापी॑या -न्भवति॒ यदि॒
नाव॒विद्ध्य॑ति स॒दृं -व्याँ॒वृत्का॑म ए॒तेन॑

य॒ज्ञेन॑ यजेत क्षु॒रप॑वि॒र् ह्ये॑ष
य॒ज्ञस्ता॒ज -क्पुण्यो॑ वा॒ भव॑ति॒ प्र वा॑
मीयते॒ तस्यै॒तद्व्र॒त -न्नानृ॑तं -वँदे॒न्न
मा॒ग्ं॒ सम॑श्ञीया॒न्न
स्त्रिय॒मुपे॑या॒न्नास्य॒ पल्पू॑लनेन॒ वासः॑
पल्पूलयेयु -रे॒तद्धि दे॒वा -स्सर्व॒ -न्न
कु॒र्वन्ति॑ ॥ 32 ॥
(च॒न्द्रमा॒ -द्वे -दे॑वलो॒कमे॒व – य -द्य॒ज्ञं -
प॑ल्पूलयेयुः॒ -षट् च॑) (अ. 5)

ए॒ष वै दे॑वर॒थो य -द्द॑र् शपूर्णमा॒सौ यो द॑र्
शपूर्णमा॒सावि॒ष्ट्वा सोमे॑न॒ यज॑ते॒
रथ॑स्पष्ट ए॒वाव॒साने॒ वरे॑ दे॒वाना॒मव॑
स्यत्ये॒तानि॒ वा अङ्गा॒परूग्ं॑षि सं
वँथ्स॒रस्य॒ य -द्द॑र् शपूर्णमा॒सौ य ए॒वं -
विँ॒द्वा -न्द॑र् शपूर्णमा॒सौ यज॒ते -
ऽङ्गा॒परूग्॑ष्ये॒व सं॑ वँथ्स॒रस्य॒ प्रति॑
दधात्ये॒ ते वै सं॑ वँथ्स॒रस्य॒ चक्षु॑षी॒ य -
द्द॑र् शपूर्णमा॒सौ य ए॒वं -विँ॒द्वा -न्द॑र्
शपूर्णमा॒सौ यज॑ते॒ ताभ्या॑मे॒व सु॑व॒र्गं -
लोँ॒कमनु॑ पश्य - [पश्यति , ए॒षा वै] 33

-त्ये॒षा वै दे॒वानां॒ -विँक्रा᳚न्ति॒ र्य -द्द॑र्
शपूर्णमा॒सौ य ए॒वं -विँ॒द्वा -न्द॑र् शपूर्णमा॒सौ
यज॑ते दे॒वाना॑मे॒व विक्रा᳚न्ति॒मनु॒ विक्र॑मत
ए॒ष वै दे॑व॒यानः॒ पन्था॒ य -द्द॑र् शपूर्णमा॒सौ य
ए॒वं -विँ॒द्वा -न्द॑र् शपूर्णमा॒सौ यज॑ते॒ य ए॒व
दे॑व॒यानः॒ पन्था॒स्तग्ं स॒मारो॑हत्ये॒तौ वै
दे॒वाना॒ग्ं॒ हरी॒ य -द्द॑र् शपूर्णमा॒सौ य ए॒वं -
विँ॒द्वा -न्द॑र् शपूर्णमा॒सौ यज॑ते॒ यावे॒व
दे॒वाना॒ग्ं॒ हरी॒ ताभ्या॑ - [हरी॒ ताभ्या᳚म् ,
ए॒वैभ्यो॑ ह॒व्यं -] 34

-मे॒वैभ्यो॑ ह॒व्यं -वँ॑हत्ये॒तद्वै
दे॒वाना॑मा॒स्यं॑ -यँ -द्द॑र् शपूर्णमा॒सौ य ए॒वं -
विँ॒द्वा -न्द॑र् शपूर्णमा॒सौ यज॑ते सा॒क्षादे॒व
दे॒वाना॑मा॒स्ये॑ जुहोत्ये॒ष वै ह॑विर्धा॒नी यो
द॑र् शपूर्णमासया॒जी सा॒यम्प्रा॑तरग्निहो॒त्र -
ञ्जु॑होति॒ यज॑ते दर् शपूर्णमा॒सा -वह॑रहर् -
हविर्धा॒निनाग्ं॑ सु॒तो य ए॒वं -विँ॒द्वा -न्द॑र्
शपूर्णमा॒सौ यज॑ते हविर्धा॒न्य॑स्मीति॒

सर्व॑मे॒वास्य॑ बर् हि॒ष्य॑ -न्द॒त्त -म्भ॑वति
दे॒वावा अह॑ - [अहः, य॒ज्ञिय॒ -न्नावि॑न्द॒ -न्ते] 35

-र्य॒ज्ञिय॒ -न्नावि॑न्द॒ -न्ते द॑र्
शपूर्णमा॒साव॑पुन॒ -न्तौ वा ए॒तौ पू॒तौ मेद्ध्यौ॒
य -द्द॑र् शपूर्णमा॒सौ य ए॒वं -विँ॒द्वा -न्द॑र्
शपूर्णमा॒सौ यज॑ते पू॒तावे॒वैनौ॒ मेद्ध्यौ॑
यजते॒ नामा॑वा॒स्या॑या -ञ्च पौर्णमा॒स्या -ञ्च॒
स्त्रिय॒ -मुपे॑या॒द्य - दु॑पे॒यान्निरि॑न्द्रिय -
स्स्या॒ -थ्सोम॑स्य॒ वै राज्ञो᳚ -ऽर्धमा॒सस्य॒
रात्र॑यः॒ पत्न॑य आस॒ -न्तासा॑ममावा॒स्या᳚ -ञ्च
पौर्णमा॒सी -ञ्च॒ नोपै॒ - [नोपै᳚त् , ते ए॑नम॒भि] 36

-त्ते ए॑नम॒भि सम॑नह्येता॒ -न्तं -यँक्ष्म॑
आर्च्छ॒ -द्राजा॑नं॒ -यँक्ष्म॑ आर॒दिति॒ त -
द्रा॑जय॒क्ष्मस्य॒ जन्म॒ य -त्पापी॑या॒नभ॑व॒ -त्त -
त्पा॑पय॒क्ष्मस्य॒ यज्जा॒याभ्या॒मवि॑न्द॒ -
त्तज्जा॒येन्य॑स्य॒ य ए॒वमे॒तेषां॒ -
यँक्ष्मा॑णा॒ -ञ्जन्म॒ वेद॒ नैन॑मे॒ते
यक्ष्मा॑विन्दन्ति॒ स ए॒ते ए॒व
न॑म॒स्यन्नुपा॑धाव॒ -त्ते अ॑ब्रूतां॒ -वँरं॑ -
वृँणावहा आ॒व -न्दे॒वाना᳚ -म्भाग॒धे अ॑सावा॒ - [
अ॑साव , आ॒वदधि॑ दे॒वा] 37

-ऽवदधि॑ दे॒वा इ॑ज्यान्ता॒ इति॒ तस्मा᳚ -
थ्स॒दृशी॑ना॒ग्ं॒ रात्री॑णा -ममावा॒स्या॑या -ञ्च
पौर्णमा॒स्या -ञ्च॑ दे॒वा इ॑ज्यन्त ए॒ते हि
दे॒वाना᳚ -म्भाग॒धे भा॑ग॒धा अ॑स्मै मनु॒ष्या॑
भवन्ति॒ य ए॒वं -वेँद॑ भू॒तानि॒ क्षुध॑मघ्नन् -
थ्स॒द्यो म॑नु॒ष्या॑ अर्धमा॒से दे॒वा मा॒सि
पि॒तरः॑ सं वँथ्स॒रे वन॒स्पत॑य॒ -स्तस्मा॒ -दह॑रह -
र्मनु॒ष्या॑ अश॑नमिच्छन्ते ऽर्धमा॒से दे॒वा
इ॑ज्यन्ते मा॒सि पि॒तृभ्यः॑ क्रियते सं वँथ्स॒रे
वन॒स्पत॑यः॒ फल॑ -ङ्गृह्णन्ति॒ य ए॒वं -वेँद॒
हन्ति॒ क्षुध॒ -म्भ्रातृ॑व्यम् ॥ 38 ॥
(प॒श्य॒ति॒ – ताभ्या॒ -मह॑ – रै – दसाव॒ -फलग्ं॑ -
स॒प्त च॑) (अ. 6)

दे॒वा वै नर्चि न यजु॑ष्यश्रयन्त॒ ते साम॑न्ने॒वा
-ऽश्र॑यन्त॒ हि -ङ्क॑रोति॒ सामै॒वा -ऽक॒र्॒हि -
ङ्क॑रोति॒ यत्रै॒व दे॒वा अश्र॑यन्त॒ तत॑ ए॒वैना॒

-न्प्रयु॑ङ्क्ते॒ हि -ङ्क॑रोति वा॒च ए॒वैष योगो॒
हि -ङ्क॑रोति प्र॒जा ए॒व त -द्यज॑मान -स्सृजते॒
त्रिः प्र॑थ॒मामन्वा॑ह॒ त्रिरु॑त्त॒मां -
यँ॒ज्ञस्यै॒व तद्ब॒र्॒स - [तद्ब॒र्॒सम् ,
न॒ह्य॒त्यप्र॑स्रग्ंसाय॒ -] 39

-न्न॑ह्य॒त्यप्र॑स्रग्ंसाय॒ सन्त॑त॒मन्वा॑ह
प्रा॒णाना॑म॒न्नाद्य॑स्य॒ सन्त॑त्या॒ अथो॒
रक्ष॑सा॒मप॑हत्यै॒ राथ॑तंरी -म्प्रथ॒मामन्वा॑ह॒
राथ॑तंरो॒ वा अ॒यं -लोँ॒क इ॒ममे॒व लो॒कम॒भि
ज॑यति॒ त्रिर्वि गृ॑ह्णाति॒ त्रय॑ इ॒मे लो॒का
इ॒माने॒व लो॒कान॒भि ज॑यति॒ बार् ह॑तीमुत्त॒मा -
मन्वा॑ह॒ बार् ह॑तो॒ वा अ॒सौ लो॒को॑ -ऽमुमे॒व
लो॒कम॒भि ज॑यति॒ प्र वो॒ [प्र वः॑, वाजा॒] 40

वाजा॒ इत्यनि॑रुक्ता -म्प्राजाप॒त्यामन्वा॑ह
य॒ज्ञो वै प्र॒जाप॑तिर्य॒ज्ञमे॒व
प्र॒जाप॑ति॒मा र॑भते॒ प्रवो॒ वाजा॒
इत्यन्वा॒हान्नं॒ -वैँ वाजो -ऽन्न॑मे॒वाव॑
रुन्धे॒ प्रवो॒ वाजा॒ इत्यन्वा॑ह॒ तस्मा᳚ -
त्प्रा॒चीन॒ग्ं॒ रेतो॑ धीय॒ते -ऽग्न॒ आ या॑हि
वी॒तय॒ इत्या॑ह॒ तस्मा᳚ -त्प्र॒तीचीः᳚ प्र॒जा
जा॑यन्ते॒ प्रवो॒ वाजा॒ [वाजाः᳚ , इत्यन्वा॑ह॒] 41

इत्यन्वा॑ह॒ मासा॒ वै वाजा॑ अर्धमा॒सा
अ॒भिद्य॑वो दे॒वा ह॒विष्म॑न्तो॒ गौर्घृ॒ताची॑
य॒ज्ञो दे॒वाञ्जि॑गाति॒ यज॑मान -स्सुम्न॒यु -रि॒द -
म॑सी॒द -म॒सीत्ये॒व य॒ज्ञस्य॑ प्रि॒य -न्धामाव॑
रुन्धे॒ य -ङ्का॒मये॑त॒ सर्व॒ -मायु॑ -रिया॒ -दिति॒
प्र वो॒ वाजा॒ इति॒ तस्या॒नूच्याग्न॒ आ या॑हि
वी॒तय॒ इति॒ सन्त॑त॒ -मुत्त॑र -मर्ध॒र्चमा ल॑भेत [ ]
42

प्रा॒णेनै॒वा -ऽस्या॑ -ऽपा॒न -न्दा॑धार॒
सर्व॒मायु॑रेति॒ यो वा अ॑र॒त्निग्ं
सा॑मिधे॒नीनां॒ -वेँदा॑र॒त्नावे॒व भ्रातृ॑व्य -
ङ्कुरुते -ऽर्ध॒र्चौ स -न्द॑धात्ये॒ष वा अ॑र॒त्नि -
स्सा॑मिधे॒नीनां॒ -यँ ए॒वं -वेँदा॑र॒त्नावे॒व
भ्रातृ॑व्य -ङ्कुरुत॒ ऋषेर्॑ -ऋषे॒र्वा ए॒ता
निर्मि॑ता॒ य -थ्सा॑मिधे॒न्य॑स्ता यदसं॑ -
युँक्ता॒ -स्स्युः प्र॒जया॑ प॒शुभि॒

र्यज॑मानस्य॒ वि ति॑ष्ठेरन्नर्ध॒र्चौ स -
न्द॑धाति॒ सं युँ॑नक्त्ये॒वैना॒स्ता अ॑स्मै॒ सं
युँ॑क्ता॒ अव॑रुद्धा॒ -स्सर्वा॑ -मा॒शिष॑ -
न्दुह्रे ॥ 43 ॥
(ब॒र् सं – वोँ॑ – जायन्ते॒ प्रवो॒ वाजा॑ – लभेत –
दधाति॒ सं – दश॑ च) (अ. 7)

अय॑ज्ञो॒ वा ए॒ष यो॑ -ऽसा॒मा -ऽग्न॒ आ या॑हि वी॒तय॒
इत्या॑ह रथन्त॒रस्यै॒ष वर्ण॒स्त -न्त्वा॑
स॒मिद्भि॑रङ्गिर॒ इत्या॑ह वामदे॒व्यस्यै॒ष
वर्णो॑ बृ॒हद॑ग्ने सु॒वीर्य॒मित्या॑ह बृह॒त ए॒ष
वर्णो॒ यदे॒त -न्तृ॒चम॒न्वाह॑ य॒ज्ञमे॒व त -
थ्साम॑न्वन्त -ङ्करोत्य॒ग्निर॒मुष्मि॑ -ल्लोँ॒क
आसी॑दादि॒त्यो᳚ -ऽस्मि -न्तावि॒मौ लो॒कावशा᳚न्ता -
[लो॒कावशा᳚न्तौ , आ॒स्ता॒ -न्ते दे॒वा] 44

-वास्ता॒ -न्ते दे॒वा अ॑ब्रुव॒न्नेते॒मौ वि
पर्यू॑हा॒मेत्यग्न॒ आ या॑हि वी॒तय॒ इत्य॒स्मि -
ल्लोँ॒के᳚ -ऽग्निम॑दधु र्बृ॒हद॑ग्ने
सु॒वीर्य॒मित्य॒मुष्मि॑ -ल्लोँ॒क आ॑दि॒त्य -
न्ततो॒ वा इ॒मौ लो॒काव॑शाम्यतां॒ -
यँदे॒वम॒न्वाहा॒नयो᳚ र्लो॒कयो॒ -श्शान्त्यै॒
शाम्य॑तो -ऽस्मा इ॒मौ लो॒कौ य ए॒वं -वेँद॒ पञ्च॑दश
सामिधे॒नीरन्वा॑ह॒ पञ्च॑दश॒ [पञ्च॑दश , वा
अ॑र्धमा॒सस्य॒] 45

वा अ॑र्धमा॒सस्य॒ रात्र॑यो -ऽर्धमास॒श -स्सं॑
वँथ्स॒र आ᳚प्यते॒ तासा॒ -न्त्रीणि॑ च श॒तानि॑
ष॒ष्टिश्चा॒क्षरा॑णि॒ ताव॑ती -स्सं वँथ्स॒रस्य॒
रात्र॑यो -ऽक्षर॒श ए॒व सं॑ वँथ्स॒रमा᳚प्नोति
नृ॒मेध॑श्च॒ परु॑च्छेपश्च
ब्रह्म॒वाद्य॑मवदेताम॒स्मि -न्दारा॑वा॒र्द्रे᳚ -
ऽग्नि -ञ्ज॑नयाव यत॒रो नौ॒ ब्रह्मी॑या॒निति॑
नृ॒मेधो॒ -ऽभ्य॑वद॒ -थ्स धू॒मम॑जनय॒ -
त्परु॑च्छेपो॒ ऽभ्य॑वद॒ -थ्सो᳚ -ऽग्निम॑जनय॒दृष॒
इत्य॑ब्रवी॒ - [इत्य॑ब्रवीत् , यथ्स॒माव॑द्वि॒द्व]
46

-द्यथ्स॒माव॑द्वि॒द्व क॒था त्वम॒ग्निमजी॑जनो॒
नाहमिति॑ सामिधे॒नीना॑मे॒वाहं -वँर्णं॑ -
वेँ॒देत्य॑ब्रवी॒द्य -द्घृ॒तव॑ -

त्प॒दम॑नू॒च्यते॒ स आ॑सां॒ -वँर्ण॒स्त -न्त्वा॑
स॒मिद्भि॑रङ्गिर॒ इत्या॑ह सामिधे॒नीष्वे॒व
तज्ज्योति॑ र्जनयति॒ स्त्रिय॒स्तेन॒ यदृच॒ -
स्स्त्रिय॒स्तेन॒ य -द्गा॑य॒त्रिय॒ -
स्स्त्रिय॒स्तेन॒ य -थ्सा॑मिधे॒न्यो॑
वृष॑ण्वती॒ -मन्वा॑ह॒ [वृष॑ण्वती॒ -मन्वा॑ह , तेन॒
पुग्ग् स्व॑ती॒स्तेन॒] 47

तेन॒ पुग्ग् स्व॑ती॒स्तेन॒ सेन्द्रा॒स्तेन॑
मिथु॒ना अ॒ग्निर्दे॒वाना᳚ -न्दू॒त आसी॑दु॒शना॑
का॒व्यो -ऽसु॑राणा॒ -न्तौ प्र॒जाप॑ति -
म्प्र॒श्ञमै॑ता॒ग्ं॒ स प्र॒जाप॑तिर॒ग्नि -
न्दू॒तं -वृँ॑णीमह॒ इत्य॒भि प॒र्याव॑र्तत॒ ततो॑
दे॒वा अभ॑व॒ -न्परा -ऽसु॑रा॒ यस्यै॒वं -विँ॒दुषो॒ -
ऽग्नि -न्दू॒तं -वृँ॑णीमह॒ इत्य॒न्वाह॒
भव॑त्या॒त्मना॒ परा᳚ -ऽस्य॒ भ्रातृ॑व्यो
भवत्यद्ध्व॒रव॑ती॒मन्वा॑ह॒
भ्रातृ॑व्यमे॒वैतया᳚ [भ्रातृ॑व्यमे॒वैतया᳚ ,
ध्व॒र॒ति॒ शो॒चिष्के॑श॒स्तमी॑मह॒] 48

ध्वरति शो॒चिष्के॑श॒स्तमी॑मह॒ इत्या॑ह
प॒वित्र॑मे॒वैत -द्यज॑मानमे॒वैतया॑ पवयति॒
समि॑द्धो अग्न आहु॒तेत्या॑ह परि॒धिमे॒वैत -
म्परि॑ दधा॒त्यस्क॑न्दाय॒ यदत॑
ऊ॒र्ध्वम॑भ्याद॒द्ध्याद्यथा॑ बहिः परि॒धि
स्कन्द॑ति ता॒दृगे॒व त -त्त्रयो॒ वा अ॒ग्नयो॑
हव्य॒वाह॑नो दे॒वाना᳚ -ङ्कव्य॒वाह॑नः
पितृ॒णाग्ं स॒हर॑क्षा॒ असु॑राणा॒ -न्त ए॒तर् ह्या
शग्ं॑सन्ते॒ मां -वँ॑रिष्यते॒ मा - [माम्, इति॑] 49

-मिति॑ वृणी॒द्ध्वग्ं ह॑व्य॒वाह॑न॒मित्या॑ह॒ य
ए॒व दे॒वाना॒ -न्तं -वृँ॑णीत आर् षे॒यं -वृँ॑णीते॒
बन्धो॑रे॒व नैत्यथो॒ सन्त॑त्यै
प॒रस्ता॑द॒र्वाचो॑ वृणीते॒ तस्मा᳚ -
त्प॒रस्ता॑द॒र्वाञ्चो॑ मनु॒ष्या᳚ -न्पि॒तरो -
ऽनु॒ प्र पि॑पते ॥ 50 ॥
(अशा᳚न्ता – वाह॒ पञ्च॑दशा – ब्रवी॒ – दन्वा॑है॒
– तया॑ – वरिष्यते॒ मा –
मेका॒न्नत्रि॒ग्ं॒शच्च॑) (अ. 8)

अग्ने॑ म॒हाग्ं अ॒सीत्या॑ह म॒हान् . ह्ये॑ष
यद॒ग्नि ब्रा ᳚ह्म॒णेत्या॑ह ब्राह्म॒णो
ह्ये॑ष भा॑र॒तेत्या॑है॒ष हि दे॒वेभ्यो॑ ह॒व्य -
म्भर॑ति दे॒वेद्ध॒ इत्या॑ह दे॒वा
ह्ये॑तमैन्ध॑त॒ मन्वि॑द्ध॒ इत्या॑ह॒ मनु॒र्
ह्ये॑तमुत्त॑रो दे॒वेभ्य॒ ऐन्धर् षि॑ष्टुत॒
इत्या॒हर् ष॑यो॒ ह्ये॑तमस्तु॑व॒न्
विप्रा॑नुमदित॒ इत्या॑ह॒ [इत्या॑ह , विप्रा॒
ह्ये॑ते] 51

विप्रा॒ ह्ये॑ते यच्छु॑श्रुवाग्ं॑सः कविश॒स्त
इत्या॑ह क॒वयो॒ ह्ये॑ते यच्छु॑श्रुवाग्ं॑सो॒
ब्रह्म॑सग्ंशित॒ इत्या॑ह॒ ब्रह्म॑सग्ंशितो॒
ह्ये॑ष घृ॒ताह॑वन॒ इत्या॑ह घृ॒ताहु॒तिर् ह्य॑स्य
प्रि॒यत॑मा प्र॒णीर्य॒ज्ञाना॒मित्या॑ह
प्र॒णीर् ह्ये॑ष य॒ज्ञानाग्ं॑
र॒थीर॑द्ध्व॒राणा॒मित्या॑है॒ष हि दे॑वर॒थो॑ -
ऽतूर्तो॒ होतेत्या॑ह॒ न ह्ये॑त -ङ्कश्च॒न [ ] 52

तर॑ति॒ तूर्णि॑र् -हव्य॒वाडित्या॑ह॒
सर्व॒ग्ग॒ह्ये॑ष तर॒त्यास्पात्र॑ -
ञ्जु॒हूर्दे॒वाना॒मित्या॑ह जु॒हूर् ह्ये॑ष
दे॒वाना ᳚ -ञ्चम॒सो दे॑व॒पान॒ इत्या॑ह चम॒सो
ह्ये॑ष दे॑व॒पानो॒ -ऽराग्ं॒ इ॑वाग्ने
ने॒मिर्दे॒वाग् स्त्व -म्प॑रि॒भूर॒सीत्या॑ह
दे॒वान् ह्ये॑ष प॑रि॒भूर्य -द्ब्रू॒यादा व॑ह
दे॒वा -न्दे॑वय॒ते यज॑माना॒येति॒
भ्रातृ॑व्यमस्मै [भ्रातृ॑व्यमस्मै , ज॒न॒ये॒दा
व॑ह] 53

जनये॒दा व॑ह दे॒वान् . यज॑माना॒येत्या॑ह॒
यज॑मानमे॒वैतेन॑ वर्धयत्य॒ग्निम॑ग्न॒ आ व॑ह॒
सोम॒मा व॒हेत्या॑ह दे॒वता॑ ए॒व त -
द्य॑थापू॒र्वमुप॑ ह्वयत॒ आ चा᳚ग्ने दे॒वान् . वह॑
सु॒यजा॑ च यज जातवेद॒ इत्या॑हा॒ग्निमे॒व त -
थ्सग्॒ श्य॑ति॒ सो᳚ -ऽस्य॒ सग्ंशि॑तो दे॒वेभ्यो॑
ह॒व्यं -व॑ँहत्य॒ग्निर् -होते - [-होता ᳚ , इत्या॑हा॒ -
ऽग्निर्वै] 54

-त्या॑हा॒ -ऽग्निर्वै दे॒वाना॒ग्ं॒ होता॒ य ए॒व
दे॒वाना॒ग्ं॒ होता॒ तं -वृ॑ँणीते॒स्मो

व॒यमित्या॑हा॒ -ऽऽत्मान॑मे॒व स॒त्त्व -ङ्ग॑मयति
सा॒धु ते॑ यजमान दे॒वतेत्या॑हा॒ -
ऽऽशिष॑मे॒वैतामा शा᳚स्ते॒ यद्ब्रू॒या -द्यो᳚ -
ऽग्निग्ं होता॑र॒मवृ॑था॒ इत्य॒ग्निनो॑भ॒यतो॒
यज॑मान॒ -म्परि॑ गृह्णीया -त्प्र॒मायु॑क -स्स्या -
द्यजमानदेव॒त्या॑ वै जु॒हूर्भ्रा॑तृव्य
देव॒त्यो॑प॒भृ - [देव॒त्यो॑प॒भृत् , यद्द्वे इ॑व] 55

-द्यद्द्वे इ॑व ब्रू॒या -द्भ्रातृ॑व्यमस्मै जनये -
द्घृ॒तव॑तीमद्ध्वर्यो॒ स्रुच॒मा -
ऽस्य॒स्वेत्या॑ह॒ यज॑मान मे॒वैतेन॑ वर्धयति
देवा॒युव॒मित्या॑ह दे॒वान् . ह्ये॑षा -ऽव॑ति
वि॒श्ववा॑रा॒मित्या॑ह॒ विश्व॒ग्ग्॒ ह्ये॑षा -
ऽव॒तीडा॑महै दे॒वाग्ं ई॒डेन्या᳚न्नम॒स्याम॑
नम॒स्यान्॑ यजा॑म य॒ज्ञिया॒नित्या॑हमनु॒ष्या॑
वा ई॒डेन्याः᳚ पि॒तरो॑ नम॒स्या॑ दे॒वा य॒ज्ञिया॑
दे॒वता॑ ए॒व त -द्य॑थाभा॒गं -यँ॑जति ॥ 56 ॥
(विप्रा॑नुमदित॒ इत्या॑ह – च॒ना – ऽस्मै॒ –
होतो॑ – प॒भृ -द् - दे॒वता॑ ए॒व – त्रीणि॑ च) (अ. 9)

त्रीग् स्तृ॒चाननु॑ ब्रूया -द्राज॒न्य॑स्य॒
त्रयो॒ वा अ॒न्ये रा॑ज॒न्या᳚ -त्पुरु॑षा
ब्राह्म॒णो वैश्यः॑ शू॒द्रस्ताने॒वास्मा॒
अनु॑कान् करोति॒ पञ्च॑द॒शानु॑ ब्रूया -
द्राज॒न्य॑स्य पञ्चद॒शो वै रा॑ज॒न्यः॑ स्व
ए॒वैन॒ग्ग्॒ स्तोमे॒ प्रति॑ष्ठापयति
त्रि॒ष्टुभा॒ परि॑ दद्ध्यादिन्द्रि॒यं -वैँ
त्रि॒ष्टुगि॑न्द्रि॒यका॑मः॒ खलु॒ वै
रा॑ज॒न्यो॑ यजते त्रि॒ष्टुभै॒वास्मा॑
इन्द्रि॒य -म्परि॑ गृह्णाति॒ यदि॑ का॒मये॑त [
का॒मये॑त , ब्र॒ह्म॒व॒र्च॒सम॒स्त्विति॑] 57

ब्रह्मवर्च॒सम॒स्त्विति॑ गायत्रि॒या परि॑
दद्ध्या -द्ब्रह्मवर्च॒सं -वैँ गा॑य॒त्री
ब्र॑ह्मवर्च॒समे॒व भ॑वति स॒प्तद॒शानु॑ ब्रूया॒ -
द्वैश्य॑स्य सप्तद॒शो वै वैश्य॒ -स्स्व
ए॒वैन॒ग्ग्॒ स्तोमे॒ प्रति॑ ष्ठापयति॒जग॑त्या॒
परि॑ दद्ध्या॒ज्जाग॑ता॒ वै प॒शवः॑ प॒शुका॑मः॒
खलु॒ वै वैश्यो॑ यजते॒ जग॑त्यै॒वास्मै॑ प॒शू -
न्परि॑ गृह्णा॒त्ये क॑विग्ं शति॒मनु॑ ब्रूया -
त्प्रति॒ष्ठाका॑मस्यै कवि॒ग्ं॒श -स्स्तोमा॑ना -

म्प्रति॒ष्ठा प्रति॑ष्ठित्यै॒ [प्रति॑ष्ठित्यै ,
चतु॑र्विग्ंशति॒मनु॑] 58

चतु॑र्विग्ंशति॒मनु॑ ब्रूया -द्ब्रह्मवर्च॒स -
का॑मस्य॒ चतु॑र्विग्ंशत्यक्षरा गाय॒त्री
गा॑य॒त्री ब्र॑ह्मवर्च॒स -ङ्गा॑यत्रि॒यैवास्मै᳚
ब्रह्मवर्च॒समव॑ रुन्धे त्रि॒ग्ं॒शत॒मनु॑
ब्रूया॒दन्न॑कामस्य त्रि॒ग्ं॒शद॑क्षरा
वि॒राडन्नं॑ -विँ॒रा -ड्वि॒राजै॒वास्मा॑
अ॒न्नाद्य॒मव॑ रुन्धे॒ द्वात्रिग्ं॑शत॒मनु॑
ब्रूया -त्प्रति॒ष्ठाका॑मस्य॒
द्वात्रिग्ं॑शदक्षरा ऽनु॒ष्टुग॑नु॒ष्टु -
प्छन्द॑सा -म्प्रति॒ष्ठा प्रति॑ष्ठित्यै॒
षट्त्रिग्ं॑शत॒मनु॑ ब्रूया -त्प॒शुका॑मस्य॒
षट्त्रिग्ं॑शदक्षरा बृह॒ती बार् ह॑ताः प॒शवो॑
बृह॒त्यैवास्मै॑ प॒शू - [प॒शून् , अव॑ रुन्धे॒] 59

-नव॑ रुन्धे॒ चतु॑श्चत्वारिग्ंशत॒मनु॑
ब्रूयादिन्द्रि॒यका॑मस्य॒
चतु॑श्चत्वारिग्ंशदक्षरा
त्रि॒ष्टुगि॑न्द्रि॒य -न्त्रि॒ष्टु -
प्त्रि॒ष्टुभै॒वास्मा॑ इन्द्रि॒यमव॑ रुन्धे॒
ऽष्टाच॑त्वारिग्ं शत॒मनु॑ ब्रूया -
त्प॒शुका॑मस्या॒ष्टाच॑त्वारिग्ंशदक्षरा॒
जग॑ती॒ जाग॑ताः प॒शवो॒जग॑त्यै॒वास्मै॑ प॒शूनव॑
रुन्धे॒ सर्वा॑णि॒ छन्दा॒ग्॒ स्यनु॑ ब्रूया -
द्बहुया॒जिन॒ -स्सर्वा॑णि॒ वा ए॒तस्य॒
छन्दा॒ग्॒स्य व॑रुद्धानि॒ यो
ब॑हुया॒ज्यप॑रिमित॒मनु॑ ब्रूया॒दप॑रिमित॒स्या
व॑रुध्यै ॥ 60 ॥
(का॒मये॑त॒ – प्रति॑ष्ठित्यै – प॒शून्थ् –
स॒प्तच॑त्वारिग्ंशच्च) (अ. 10)

निवी॑त -म्मनु॒ष्या॑णा -म्प्राचीनावी॒त -
म्पि॑तृ॒णामुप॑वीत -न्दे॒वाना॒मुप॑ व्ययते
देवल॒क्ष्ममे॒व त -त्कु॑रुते॒ तिष्ठ॒न्नन्वा॑ह॒
तिष्ठ॒न्न्॒ . ह्याश्रु॑ततरं॒ -वँद॑ति॒
तिष्ठ॒न्नन्वा॑ह सुव॒र्गस्य॑
लो॒कस्या॒भिजि॑त्या॒ आसी॑नो यजत्य॒स्मिन्ने॒व
लो॒के प्रति॑तिष्ठति॒ य -त्क्रौ॒ञ्चम॒न्वाहा॑ -
ऽऽसु॒र -न्त -द्यन्म॒न्द्र -म्मा॑नु॒ष -

न्तद्यद॑न्त॒रा त -थ्सदे॑वमन्त॒रा -ऽनूच्यग्ं॑
सदेव॒त्वाय॑ वि॒द्वाग्ंसो॒ वै [ ] 61

पु॒रा होता॑रो -ऽभूव॒ -न्तस्मा॒ -द्विधृ॑ता॒
अद्ध्वा॒नो -ऽभू॑व॒ -न्न पन्था॑न॒ -
स्सम॑रुक्षन्नन्तर्वे॒द्य॑न्यः पादो॒ भव॑ति
बहिर्वे॒द्य॑न्यो -ऽथान्वा॒हाद्ध्व॑नां॒ -
विँधृ॑त्यै प॒थामसग्ं॑ रोहा॒याथो॑ भू॒तञ्चै॒व
भ॑वि॒ष्यच्चाव॑ रु॒न्धे -ऽथो॒ परि॑मित -
ञ्चै॒वाप॑रिमित॒ -ञ्चाव॑ रु॒न्धे -ऽथो᳚
ग्रा॒म्याग् श्चै॒व प॒शूना॑र॒ण्याग् श्चाव॑
रु॒न्धे -ऽथो॑ [रु॒न्धे -ऽथो᳚, दे॒व॒लो॒क -ञ्चै॒व] 62

देवलो॒क -ञ्चै॒व म॑नुष्य लो॒क -ञ्चा॒भि ज॑यति
दे॒वा वै सा॑मिधे॒नीर॒नूच्य॑ य॒ज्ञ -
न्नान्व॑पश्य॒न् थ्स प्र॒जाप॑तिस्तू॒ष्णी -
मा॑घा॒रमा ऽघा॑रय॒ -त्ततो॒ वै दे॒वा
य॒ज्ञमन्व॑पश्य॒न्॒ . य -त्तू॒ष्णीमा॑घा॒र -
मा॑घा॒रय॑ति य॒ज्ञस्यानु॑ख्यात्या॒ अथो॑
सामिधे॒नीरे॒वाभ्य॑ -न॒क्त्यलू᳚क्षो भवति॒ य
ए॒वं -वेँदाथो॑ त॒र्पय॑त्ये॒वैना॒ -स्तृप्य॑ति
प्र॒जया॑ प॒शुभि॒ - [प॒शुभिः॑ , य ए॒वं -वेँद॒] 63

-र्य ए॒वं -वेँद॒ यदेक॑या ऽऽघा॒रये॒देका᳚ -
म्प्रीणीया॒द्य -द्द्वाभ्या॒ -न्द्वे
प्री॑णीया॒द्य -द्ति॒सृभि॒रति॒
तद्रे॑चये॒त्मन॒सा ऽऽघा॑रयति॒ मन॑सा॒
ह्यना᳚प्तमा॒प्यते॑ ति॒र्यञ्च॒मा
घा॑रय॒त्यछ॑म्बट्कारं॒ -वाँक्च॒ मन॑श्चा
ऽऽर्तीयेताम॒ह -न्दे॒वेभ्यो॑ ह॒व्यं -
वँ॑हा॒मीति॒ वाग॑ब्रवीद॒ह -न्दे॒वेभ्य॒ इति॒
मन॒स्तौ प्र॒जाप॑ति -म्प्र॒श्ञमै॑ता॒ग्ं॒ सो᳚ -
ऽब्रवी - [सो᳚ -ऽब्रवीत् , प्र॒जाप॑तिर्दू॒तीरे॒व] 64

-त्प्र॒जाप॑तिर्दू॒तीरे॒व त्व -म्मन॑सो -ऽसि॒
यद्धि मन॑सा॒ ध्याय॑ति॒ तद्वा॒चा वद॒तीति॒ त -
त्खलु॒ तुभ्य॒ -न्न वा॒चा जु॑हव॒न्नित्य॑ब्रवी॒ -
त्तस्मा॒न्मन॑सा प्र॒जाप॑तये जुह्वति॒मन॑ इव॒
हि प्र॒जाप॑तिः प्र॒जाप॑ते॒राप्त्यै॑ परि॒धीन्
थ्स -म्मा᳚र् ष्टि पु॒नात्ये॒वैना॒न्
त्रिर्म॑द्ध्य॒म -न्त्रयो॒ वै प्रा॒णाः

प्रा॒णाने॒वाभि ज॑यति॒ त्रिर्द॑क्षिणा॒र्ध्यं॑
त्रय॑ [-त्रयः॑ , इ॒मे लो॒का] 65

इ॒मे लो॒का इ॒माने॒व लो॒कान॒भि ज॑यति॒
त्रिरु॑त्तरा॒र्ध्य॑ -न्त्रयो॒ वै दे॑व॒यानाः॒
पन्था॑न॒स्ताने॒वाभि ज॑यति॒ त्रिरुप॑ वाजयति॒
त्रयो॒ वै दे॑वलो॒का दे॑वलो॒काने॒वाभि ज॑यति॒
द्वाद॑श॒ स -म्प॑द्यन्ते॒ द्वाद॑श॒ मासा᳚ -स्सं
वँथ्स॒र -स्सं॑ वँथ्स॒रमे॒व प्री॑णा॒त्यथो॑ सं
वँथ्स॒रमे॒वास्मा॒ उप॑ दधाति सुव॒र्गस्य॑
लो॒कस्य॒ सम॑ष्ट्या आघा॒रमा घा॑रयति ति॒र इ॑व॒ [
ति॒र इ॑व, वै सु॑व॒र्गो] 66

वै सु॑व॒र्गो लो॒क -स्सु॑व॒र्गमे॒वास्मै॑ लो॒क -
म्प्ररो॑चयत्यृ॒जुमा घा॑रयत्यृ॒जुरि॑व॒ हि
प्रा॒ण -स्सन्त॑त॒मा घा॑रयति
प्रा॒णाना॑म॒न्नाद्य॑स्य॒ सन्त॑त्या॒ अथो॒
रक्ष॑सा॒मप॑हत्यै॒ य -ङ्का॒मये॑त प्र॒मायु॑क -
स्स्या॒दिति॑ जि॒ह्म -न्तस्या ऽऽघा॑रये -
त्प्रा॒णमे॒वास्मा᳚ज्जि॒ह्म -न्न॑यति ता॒ज -
क्प्रमी॑यते॒शिरो॒ वा ए॒त -द्य॒ज्ञस्य॒ यदा॑घा॒र
आ॒त्मा ध्रु॒वा - [आ॒त्मा ध्रु॒वा ,
आ॒घा॒रमा॒घार्य॑] 67

-ऽऽघा॒रमा॒घार्य॑ ध्रु॒वाग्ं
सम॑नक्त्या॒त्मन्ने॒व य॒ज्ञस्य॒ शिरः॒ प्रति॑
दधात्य॒ग्नि -र्दे॒वाना᳚ -न्दू॒त आसी॒ -द्दैव्यो -
ऽसु॑राणा॒ -न्तौ प्र॒जाप॑ति -म्प्र॒श्ञ -
मै॑ता॒ग्ं॒ स प्र॒जाप॑ति र्ब्राह्म॒ण -म॑ब्रवी -
दे॒तद्वि ब्रू॒हीत्या श्रा॑व॒येती॒द -न्दे॑वा -
श्शृणु॒तेति॒ वाव तद॑ब्रवी -द॒ग्नि र्दे॒वो
होतेति॒ य ए॒व दे॒वाना॒ -न्तम॑वृणीत॒ ततो॑ दे॒वा [
दे॒वाः , अभ॑व॒ -न्परा -ऽसु॑रा॒] 68

अभ॑व॒ -न्परा -ऽसु॑रा॒ यस्यै॒वं -विँ॒दुषः॑ प्रव॒र -
म्प्र॑वृ॒णते॒ भव॑त्या॒त्मना॒ परा᳚ -ऽस्य॒
भ्रातृ॑व्यो भवति॒ यद्ब्रा᳚ह्म॒णश्चा
ब्रा᳚ह्मणश्च प्र॒श्ञ -मे॒याता᳚ -
म्ब्राह्म॒णायाधि॑ ब्रूया॒ -द्य -
द्ब्रा᳚ह्म॒णाया॒ -ऽद्ध्याहा॒ ऽऽत्मने -
ऽद्ध्या॑ह॒ यद्ब्रा᳚ह्म॒ण -म्प॒राहा॒ -ऽऽत्मान॒ -

म्परा॑ -ऽऽह॒ तस्मा ᳚ -द्ब्राह्म॒णो न पु॒रोच्यं॑ः ॥ 69
॥
(वा **–** आ॑र॒ण्याग् श्चाव॑ रु॒न्धे **-**ऽथो॑ **–**
प॒शुभि॒ः **–** सो᳚ **-**ऽब्रवी **-**द् **-** दक्षिणा॒र्ध्यँ॑
त्रयं॑ **-**इव **–** ध्रु॒वा **–** दे॒वा **–**
श्चं॑त्वारि॒गं॒शच्चं॑ **) (**अ **. 11)**

आयु॑ष्ट आयु॒र्दा अ॑ग्न॒ आ प्या॑यस्व॒ स -न्ते ऽव॑
ते॒ हेड॒ उद॑त्त॒म -म्प्रणो॑ दे॒व्या नो॑ दि॒वो
ऽग्ना॑ विष्णू॒ अग्ना॑विष्णू इ॒म -म्मे॑ वरुण॒ -
तत्त्वा॑ या॒ म्यु दु॒त्य -ञ्चि॒त्रम् ॥ अ॒पा -
न्नपा॒दा ह्यस्था॑ -दु॒पस्थं॑ -ञ्जि॒ह्माना॑ -
मू॒र्ध्वो वि॒द्युतं॒ -वँसा॑नः । तस्य॒ ज्येष्ठं॑ -
म्महि॒मानं॒ -वँह॑न्ती॒र् हिर॑ण्यवर्णा॒ः परि॑
यन्ति य॒ह्वीः ॥ स - [सम् , अ॒न्या यन्त्युप॑] 70

-म॒न्या यन्त्युप॑ यन्त्य॒न्या -स्स॑मा॒नमू॒र्व -
न्न॒द्यः॑ पृणन्ति । तमू॒ शुचि॒गं॒ शुच॑यो
दीदि॒वाग्ं सम॒पा -न्नपा॑त॒ -म्परि॑तस्थु॒राप॑ः
। तमस्मे॑रा यु॒व॒तयो॒ युवा॑न -
म्मर्मृ॒ज्यमा॑ना॒ः परि॑ य॒न्त्याप॑ः ॥ स
शु॒क्रेण॒ शिक्व॑ना
रे॒वद॒ग्निर्दी॒दाया॑नि॒द्ध्मो
घृ॒तनि॑र्णि॒ग॒प्सु ॥
इन्द्रा॒वरु॑णयो॒रहग्ं॒स॒म्राजो॒रव॒ आ वृ॑णे ।
ता नो॑ मृडात ई॒दृशे ᳚ ॥ इन्द्रा॑वरुणा
यु॒वम॑द्ध्व॒राय॑ नो [यु॒वम॑द्ध्व॒राय॑ नः ,
वि॒शे जना॑य॒] 71

वि॒शे जना॑य॒ महि॒ शर्म॑ यच्छतम् ।
दी॒र्घप्र॑यज्यु॒मति॒ यो व॑नु॒ष्यति॑ व॒य -
ञ्ज॑येम॒ पृत॑नासु दू॒ढ्य॑ः ॥ आ नो॑मित्रावरुणा॒ ,
प्रबा॒हवा ᳚ ॥ त्व -न्नो॑ अग्ने॒ वरु॑णस्य वि॒द्वा -
न्दे॒वस्य॒ हेडो -ऽव॑ यासि सीष्ठाः । यजि॑ष्ठो॒
वह्नि॑ तम॒ -श्शोशु॑चानो॒ विश्वा॒ द्वेषाग्॑ं॒सि॒
प्रमु॑मुग्ध्य॒स्मत् ॥ स त्वन्नो॑ अग्ने -ऽव॒मो
भ॑वो॒ती नेदि॑ष्ठो अ॒स्या उ॒षसो॒ व्यु॑ष्टौ । अव॑
यक्ष्व नो॒ वरु॑ण॒ग्ं॒ [नो॒ वरु॑णम् , ररा॑णो वी॒हि
] 72

ररा॑णो वी॒हि मृ॑डी॒कग्ं सु॒हवो॑ न एधि ॥
प्रप्रा॒यम॒ग्निर्भ॑र॒तस्य॑ शृण्वे॒ वि य -
थ्सूर्यो॒ न रोच॑ते बृ॒हद्भाः । अ॒भि यः पू॒रु -
म्पृत॑नासु त॒स्थौ दी॒दाय॒ दैव्यो॒ अति॑थि -
श्शि॒वो न॑ः ॥ प्र ते॑ यक्षि॒ प्र त॑ इयर्मि॒ मन्म॒
भुवो॒ यथा॒ वन्द्यो॑ नो॒ हवे॑षु । धन्व॑न्निव
प्र॒पा अ॑सि॒ त्वम॑ग्न इ॒यक्षवे॑ पू॒रवे ᳚ प्रत्न
राजन्न् ॥ 73 ॥

वि पाज॑सा॒ वि ज्योति॑षा ॥ स त्वम॑ग्ने॒
प्रती॑केन॒ प्रत्यो॑ष यातुधा॒न्य॑ः ।
उ॒रु॒क्षये॑षु॒ दीद्य॑त् ॥ तग्ं सु॒प्रती॑कग्ं
सु॒दृश॒ग्ग्॒ स्वञ्च॒ -मवि॑द्वाग्ंसो
वि॒दुष्ट॑रग्ं सपेम । स य॑क्ष॒ -द्विश्वा॑
व॒युना॑नि वि॒द्वा -न्प्र ह॒व्य -म॒ग्नि -र॒मृते॑षु
वोचत् ॥ अ॒ग्ं॒हो॒मुचे॑ वि॒वेष॒ यन्मा॒ विन॑
इ॒न्द्रे -न्द्र॑ क्ष॒त्रमि॑न्द्रि॒याणि॑
शतक्र॒तो ऽनु॑ ते दायि ॥ 74 ॥
(य॒ह्वी -स्स - म॑ध्व॒राय॑ नो॒ - वरु॑णग्ं -
राज॒ग्ग्॒ -तु॑श्चत्वारिग्ं॒शच्च) (अ . 12)

(वि॒श्वरू॑प॒ – स्त्वष्टे – न्द्र॑ -वृँ॒त्र॑ –
ब्र॑ह्मवा॒दिन॒ -स्स त्वै – ना -ऽसो॑मयाज्ये॒ – ष वै
दे॑वर॒थो – दे॒वा वै नर्चि ना – य॒ज्ञो – ऽग्ने॑
म॒हान् – त्रीन् – निवी॑त॒ – मायु॑ष्टे॒ – द्वाद॑श)

(वि॒श्वरू॑पो॒ – नैनग्ं॒ शीतरू॒रा – व॒द्य वसु॒ –
पू॒र्वे॒द्यु – र्वा॒जा इत्य – ग्ने॑ म॒हान् –
निवी॑त – म॒न्या यन्ति॒ – चतु॑ः सप्ततिः)

(वि॒श्वरू॑पो॒ , ऽनु॑ ते दायि)

॥ हरि॑ः ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया -
न्द्वितीयकाण्डे पञ्चमः प्रश्न -स्समाप्तः ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh.
Phone Number: +91 9493475515 | www.amritanilayam.org